Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री जिनप्रभसूरि-कविवर-विरचित-

# श्रीचतुर्विंशतिजिनस्तवः।

विवृतिकार-मुनिश्री चन्द्रोदयविजयजी.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हं नमः ।

श्री जिनप्रभसूरि–कविवर–विरचित–

# श्रीचतुर्विंशतिजिनस्तवः ।

तदुपरि–

शासनसम्राट् आचार्यदेव श्रीमद् विजय नेमिसूरीश्वर-
पट्टालंकाराचार्यदेव श्रीविजय विज्ञानसूरीश्वर-
पट्टालंकाराचार्यश्रीविजय कस्तूरसूरीश्वर-
विनेयाणु मुनिश्री चन्द्रोदयविजय-
गुम्फितविवृतिसमलंकृतः ।

आ.श्री. कैलाससागर सूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा
क्रा. क्र.

संपादक— मुनिश्रीअशोकचंद्रविजयः ।

---

एतत् पुनाश्रीसंघार्पित सद्द्रव्येन प्रकाशितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुद्रक : भाऊ लक्ष्मणराव कोकाटे,
हनुमान छापखाना,
२०० सदाशिव पेठ, पुणें २.

प्रकाशक – प्राप्तिस्थान

मास्तर जसवंतलाल गीरधरलाल
११५ तिलक मार्ग, अमदावाद १.

श्रीगोडीजी पार्श्वनाथ जैन टेम्पल ट्रस्ट.
१११ वेताळ पेठ, पुना २ महाराष्ट्र.

वि. सं. २०१३ प्रतयः १००० वी. सं. २४८३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अर्हं नमः ।

शासनसम्राड् विजयनेमिसूरीश्वरसद्गुरुभ्यो नमः ।

श्री जिनप्रभसूरि–कविवर–विरचित–

# श्रीचतुर्विंशतिजिनस्तवः ।

मुनिश्रीचन्द्रोदयविजयकृत–

विवृतिसमलङ्कृतः ।

## मूलम्

जिनर्षभ ! प्रीणितभव्यसार्थ !
समस्तदोषाजित ! तीर्थनाथ ! ।
श्रीशम्भवाऽऽखण्डलवन्द्य ! नन्द्याः
स्वामिन् ! प्रजानामभिनन्दन ! त्वम् ॥ १ ॥ उपजातिः

## अथ विवृतिमङ्गलम् ।

सुरासुरैर्वन्दितपादपङ्कजं सदा दयारक्षितजन्तुसञ्चयम् ।
समस्तकल्याणसुरावनीरुहं नमामि तीर्थेशमहं हृदाऽऽदिमम् ॥ १ ॥

श्रीनेमिसूरिचरणाम्बुजयुग्ममन्तराधाय पूज्यचरणं शमिसार्थमुख्यम् ।
विज्ञानसूरिमथ भक्तिभरैः प्रणम्य कस्तूरसूरिमिह गौरगुणं गुरुं स्वम् ॥ २ ॥
श्रीनाभिजन्मप्रमुखवीरवरान्ततीर्थराजां स्तुतिं भवभयोन्मथनप्रवीणाम् ।
चन्द्रोदयो मुनिरहं विवृणोमि तेषां प्रीत्यै सताञ्च सुखबोधकृते सयत्नः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अन्वयः**– प्रीणितभव्यसार्थ! समस्तदोष! तीर्थनाथ! आखण्डलवन्द्य! प्रजानां स्वामिन्! जिनर्षभ! अजित! श्रीशम्भव! अभिनन्दन! त्वं नन्द्याः ॥ १ ॥

**विवृतिः– प्रीणितभव्यसार्थ!** = हे प्रसादितप्राणिसङ्घ! अहिंसादिपञ्चमहाव्रतादिदेशनया सर्वजन्तूनां प्रमोदोत्पत्तेरिति भावः। **समस्तदोष!** = परित्यक्तरागादिनिखिलदूषण! यद्वा – समस्त! इति दोषाजित! इति च भिन्नपदेनापि व्याख्यानम्। तथाच – **समस्त!** = सम्पूर्ण!, जलरत्नादिभिः समुद्र इव ज्ञानदर्शनचारित्रादिभिः सम्भृत इत्यर्थः। **दोषाजित!**=रागादिदोषानभिभूत! ज्ञानादिना रागादिसकलदोषाणां दूरीकरणात्ते एव पराजिताः, न तु स्वयं तैरभिभूतः, स्वस्मिन् तेषां सत्त्वकथाया अप्यभावादिति सुष्ठूक्तं दोषाजित! इति। **तीर्थनाथ!**= भवसागरसन्तरणसाधनीभूतप्रवचनाधारचतुर्विधसङ्घाधिप! **आखण्डलवन्द्य!** =इन्द्राभिवादनीय!। "इन्द्रो हरिर्दुश्च्यवनोऽच्युताग्रजो वज्री विडौजा मघवान् पुरन्दरः। प्राचीनबर्हिः पुरुहूतवासवौ सङ्क्रन्दनाऽऽखण्डलमेघवाहनाः॥" इत्यभिधानचिन्तामणिः (२–८५)। **प्रजानां**= जनानाम्" "लोको जनः प्रजा" इत्यभि० (३–१६५)। **स्वामिन्!** = ईश! तस्य वीतरागत्वेन यद्यपि कस्यापीशितृत्वं न सम्भवति, तथापि परमकारुणिकतया भवबन्धभिन्मार्गोपदर्शनेनाऽनुगृहीतै र्जनै र्भक्तिप्रवणतया एवमुच्यते इतिभावः। **जिनर्षभ!** = जिनश्रेष्ठ!। यद्वा–जिन इति ऋषभ इति च पृथक्पदं सम्बोधनम्। तथा च–**जिन!** = रागद्वेषमोहादिजेतृपुङ्गव!, **ऋषभ!** = तदाख्यतीर्थङ्कर!, उर्वोर्वृषभलाञ्छनसत्त्वाज्जनन्या चतुर्दशानां स्वाप्नानामादौ वृषभदर्शनाद्वेतिभावः। **अजित!** = तदाख्यद्वितीयतीर्थङ्कर!, श्लिष्टव्याख्यानेन परिषहादिभि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रनभिभूत इति ध्वनिः । अस्मिन्नजिते गर्भस्थे द्यूतादिक्रीडायां राज्ञाऽस्य जननी न जितेत्यनुसन्धानेन पित्रा गृहीताऽजितनामक ! इति च । **श्रीशम्भव** ! = तदाख्यतृतीयतीर्थङ्कर ! श्रीयुक्तेऽस्मिन् स्तुते शं शुभं भवतीति व्याख्यानेन च श्रीशुभकारक इति ध्वनिः । **अभिनन्दन** ! = तदाख्यचतुर्थतीर्थङ्कर !, गर्भात्प्रभृत्येवाभीक्ष्णं शक्रेणाभिनन्दनादिति भावः, हर्षप्रद ! इति ध्वनिः । **त्वं नन्द्याः** = अभिवर्धस्व, अस्य प्रकृते सर्वत्राऽन्वय : ॥ १ ॥

**समस्तपदविग्रहः— प्रीणितभव्यसार्थ!** = भव्यानां सार्थः स प्रीणितो येन सः, तत्सबुद्धौ । **समस्तदोष!** = समस्ता दोषा येन सः, तत्सम्बोधने । **दोषाजित** ! = इतिच्छेदे तु = दोषैरजितः, तदामन्त्रणे । **तीर्थनाथ** ! = तीर्थेषु नाथः, तदामन्त्रणे । तीर्थानां नाथ इति षष्ठीसमासस्तु शेषषष्ठ्या, न तु निर्धारणषष्ठ्या, तया समासनिषेधानुशासनात् । **जिनर्षभ** ! = जिनेषु जिनानां वा ऋषभ इति पूर्ववत्समासः । जिनश्चासौ ऋषभश्चेति कर्मधारयो वा, तदामन्त्रणे । **अजित** ! = न जितः, तदामन्त्रणे । **समस्तदोषाजित** ! इत्येकसंबोधनत्वेन व्याख्याने – समस्ताः सकलाश्च ते दोषाश्च, तैरजितः, तत्सम्बोधने । **श्रीशम्भव** ! = श्रीयुतःशम्भवः, तदामन्त्रणे । **श्लोकत्रयं यावदुपजातिश्छन्दः** ॥ १ ॥

**मूलम्**

**सुखाय पुंसां सुमते ! मुखं ते**
**मृगाङ्क ! पद्मप्रभ ! गौरकान्ते ! ।**
**सुपार्श्व ! नेतर्महसेनपुत्र !**
**त्रैलोक्यलोकस्तवनीय ! भूयात् ॥ २ ॥** उपजातिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अन्वयः**— नेतः ! त्रैलोक्यलोकस्तवनीय ! सुमते ! मृगाङ्क ! गौरकान्ते ! पद्मप्रभ ! सुपार्श्व ! महसेनपुत्र ! ते मुखं पुंसां सुखाय भूयात् ॥ २ ॥

**विवृतिः**— **नेतः** ! = नायक !, अग्रणीरित्यर्थः । यो ह्यग्रणीर्भवति, स स्वानुगतान् कृत्याकृत्ये उपदिशति, अकृत्यपरिहारेण च कृत्ये एव प्रवर्त्तयति, स्वयं च तत्र प्रवर्त्तते, तद्वज्जिनोऽपि जनानिति सष्ठूक्तं नेतरिति । **त्रैलोक्यलोकस्तवनीय** ! = त्रिभुवनजनस्तुत्य !, अन्ये हि कतिभिरेव, अयं तु त्रिभुवनजनैरिति व्यतिरेकध्वनिः, यद्वा यो हि त्रिभुवनजनानां हितचिन्तकः, सत्पथप्रवर्त्तयिता, निःस्पृहश्च, स एव तैः स्तुत्यः । वीतरागतया परमकारुणिकतया चायमेव तथा नान्य इति त्रैलोक्यलोकस्तवनीयेत्युचितमेव । यद्वा **त्रैलोक्य-लोक! इति स्तवनीय!** इति च पृथक्सम्बोधनम् । तथा च त्रैलोक्यं लोकतेऽवलोकते सकलज्ञानावरणीयकर्मक्षयजन्यकेवलज्ञानेनेति स तत्सम्बोधने, सर्वज्ञ! इत्यर्थः । **स्तवनीय** ! = स्तुतियोग्य ! न तु स्तोतुं शक्य!, गुणानामसमत्वादिति ध्वनिः । **सुमते** ! = तदाख्यतीर्थङ्कर !, सद्बुद्धे ! इतिध्वनिः । मिथ्यात्वगन्धस्याप्यभावाद्, उपदेशादिना जनानां तन्नाशकत्वाच्चेति भावः । **मृगाङ्क** ! = हरिणलाञ्छन ! श्री शांतिनाथेत्यर्थः । यद्वा मृगाङ्कश्चन्द्रः, नामैकदेशेनामग्रहणाच्चंद्रप्रभेत्यर्थः । गर्भस्थे भगवति मातुश्चंद्रपानदोहदभावात्तदाख्यतीर्थङ्करेत्यर्थः ! **महसेनपुत्र** ! = महसेनाऽऽख्यनरवरसुत !, श्रीचन्द्रप्रभेत्यर्थः । **गौरकान्ते** ! = विशदशरीरच्छवे ! **पद्मप्रभ** ! = तदाख्यतीर्थङ्कर !, कमलतुल्यकान्ते! इति ध्वनिः । **सुपार्श्व** = तदाख्यतीर्थङ्कर ! गर्भस्थे भगवति जनन्याः सुपार्श्वभावादिति भावः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोभनकक्षाधोभाग इति, शोभनसमीपप्रदेश इति, शोभनफणिचक्र इति च ध्वनिः । **ते** = तव । **मुखं** = वदनम् । **पुंसाम्** = पुरुषाणाम्, उपलक्षणत्वात्प्राणिनामित्यर्थः । **सुखाय** = शाताय भूयात् ॥ २ ॥

**समस्तपदविग्रहः—त्रैलोक्यलोकस्तवनीय !** = त्रयाणां लोकानां समाहारस्त्रिलोकी, सैव त्रैलोक्यम्, तत्र तस्य वा लोकास्त्रैलोक्यलोकाः, तैः स्तवनीयः, तत्सम्बोधने । **सुमते !** = सु शोभना बुद्धि र्यस्य स, तत्सम्बोधने । **महसेनपुत्र !** = महसेनस्य पुत्रः, तत्सम्बोधने । **मृगाङ्क !** = मृगोऽङ्को यस्य स, तत्सम्बोधने । **गौरकान्ते !** = गौरीकान्ति र्यस्य स, तत्सम्बोधने । **पद्मप्रभ !** = पद्मस्य प्रभेव प्रभा यस्य स तत्सम्बोधने । **सुपार्श्व !** = सु शोभनौ पार्श्वौ यस्य, शोभनो वा पार्श्वो यस्य स, तत्सम्बोधने ॥ २ ॥

**मूलम्**

**विरोचनाभं सुविधिं जिनेन्द्रं**
**सुभावतः शीतलमर्चयामि ।**
**श्रेयांसमर्च्यं दिविजव्रजेनाऽ—**
**सक्तं न सम्पत्सु न वासुपूज्यम् ॥ ३ ॥** उपजातिः

**अन्वयः—** दिविजव्रजेन अर्च्यं सम्पत्सु न न असक्तम् विरोचनाभं जिनेन्द्रं सुविधिं शीतलं श्रेयांसं वासुपूज्यं सुभावतः अर्चयामि ॥ ३ ॥

**विवृति :— दिविजव्रजेन** = देववृन्देन । **अर्च्यम्** = पूज्यम् । **सम्पत्सु** = क्षणिकपर्यन्तदुःखदलौकिकसमृद्धिषु, **न न असक्तम्** = अत्यन्तविरक्तम् , नञ्द्वयप्रयोगस्य प्रकृतार्थदार्ढ्यसूचकत्वात् । **विरोचनाभम्** = सूर्यसमानकान्तिम् , " द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचन " इत्यमरः । **जिनेन्द्रम्** = जिनपतिम् । **सुविधिम्** = तदाख्यतीर्थङ्क-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रम्, अथ च सौभाग्यशालिनम्, सत्कर्मानुष्ठायकञ्च, " विधिर्विधाने दैवेऽपि " त्यमरः। **शीतलम्** = तदाख्यतीर्थङ्करम्, गर्भस्थे भगवति पितुः पूर्वोत्पन्नाऽचिकित्स्यदाहस्य जननीहस्तस्पर्शेनोपशान्तेरिति-भावः। तथा शमाश्रयत्वात्क्रोधादिपरिहाराच्चानुग्रम्, सकलसत्त्व-सन्तापाऽपनोदकत्वाच्च शैत्यगुणयुक्तमिव वेत्यर्थः। **श्रेयांसम्** = तदाख्यतीर्थङ्करम्, गर्भस्थे भगवति केनाऽप्यनाक्रान्तपूर्वदेवताऽधिष्ठित-शय्या जनन्याऽऽक्रान्तेति श्रेयो जातमिति नाम्नस्तन्मूलकत्वमिति द्रष्टव्यम्, अथ च श्रेष्ठम्। **वासुपूज्यम्** = तदाख्यतीर्थङ्करम्, गर्भस्थेऽस्मिन् वासवो वसुभिः = हिरण्यादिभी राजकुलं पूजितवानिति नाम्नस्तन्मूलकत्वमिति भावः। अथ च विश्वरूपपूज्यम्, विष्णुपूज्यं वा। **सुभावतः** = सद्भावनापूर्वकम्, **अर्चयामि** = पूजयामि ॥ ३ ॥

**समस्तपदविग्रहः**– **दिविजव्रजेन** = दिवि जातवन्तो दिविजाः, सप्तम्या अलुप्, तेषां व्रजः, तेन। **असक्तम्** = न सक्तोऽसक्तस्तम्। **विरोचनाभम्** = विरोचनस्याभेवाभा यस्य तम्। **जिनेन्द्रम्** = जिनेषु जिनानां वा इन्द्र इव तम्। **सुविधिम्** = सु शोभनो विधि र्यस्य, तम्। **श्रेयांसम्** = अतिशयेन प्रशस्यः श्रेयान्, तम्। **वासुपूज्यम्** = वासुना पूज्यस्तम्, वासुश्चासौपूज्यश्च वा तम्, वसुपूज्यनृपतेरयमिति " प्रज्ञाद्याणि " वासुपूज्यस्तं वा। **सुभावतः** = सु शोभनो भावः सुभावस्तस्मात् ॥ ३ ॥

## मूलम्

**सुवर्णकान्ते ! विमल ! त्वमुच्चकै-**
**रनन्त ! विज्ञाननिविष्ट ! विष्टपे।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अहर्मणे ! धर्म ! पथप्रकाशने**

**कुरुष्व शान्ते ! हितमङ्गिनां पदम् ॥ ४ ॥** वंशस्थवृत्तम्

**अन्वयः**— सुवर्णकान्ते ! विज्ञाननिविष्ट ! पथप्रकाशने अहर्मणे ! विमल ! अनन्त ! धर्म ! शान्ते ! अङ्गिनां पदं त्वं विष्टपे उच्चकैर्हितं कुरुष्व ॥ ४ ॥

**विवृतिः— सुवर्णकान्ते !** = कनकच्छवे ! शोभनरूपप्रभ वा । **विज्ञाननिविष्ट !** = तत्वज्ञाननिपुण ! अनन्तज्ञाननिविष्ट ! इति वा, केवलज्ञानरूपामेयविशिष्टज्ञानपरिनिष्ठितेत्यर्थः । यद्वा 'विज्ञान ! ' इति 'निविष्ट ! ' इति च पृथक्सम्बोधनम्, तथा च— **विज्ञान** ! = विशिष्टज्ञानशालिन् ! तत्त्वज्ञानिन् !, केवलिन्निति वाऽर्थः । **निविष्ट** ! = चारित्रादिनिष्ठ ! । **पथप्रकाशने** = धर्माधर्मादिमार्गदर्शने, मुक्तिमार्गदर्शने वा, **अहर्मणे** ! = सूर्यरूप । **विमल** ! = तदाख्यतीर्थङ्कर । अथ च—मलरहित ! निष्कलङ्क ! निर्दोष ! इति वाऽर्थः । **अनन्त !** = तदाख्यतीर्थङ्कर !, अथ च अमेय ! इत्यर्थः । **धर्म** ! = दुर्गतौ प्रपततां जन्तूनां सन्मार्गोपदेशादिना धारणाद्, गर्भस्थे जिने जनन्या दानादिधर्मपरत्वाद्वा तदाख्यतीर्थङ्कर !, यद्वा '**धर्मपथप्रकाशने**' इत्येकं पदम्, तथा च धर्ममार्गदर्शने इत्यर्थः । **शान्ते** ! = शान्तिकर्तृत्वात्, शान्त्यात्मकत्वाद्वा शान्तियोगात्, गर्भस्थेऽस्मिन् पूर्वोत्पन्नाशिवशान्तिभावाद्वा तदाख्यतीर्थङ्कर ! । अथ च शमाशाविषय इत्यर्थः । **आङ्गिनां** = प्राणिनाम् । **पदम्** = आश्रयः, स्थानमित्यर्थः । "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वि" त्यमरः । **त्वम्** । **विष्टपे** = जगति, "विष्टपं भुवनं जगदि" त्यमरः । **उच्चकैः** = अति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शयेन । **हितम्** = व्याबाधारहितत्वेन कल्याणमयम् । **कुरुष्व** = जनय, निरञ्जननिराकारशाश्वतानन्दमयं शिवपदं देहीति यावत् । तथा च **विष्टपे** = लोकविषये । **अङ्गिनाम्** = सांसारिकप्राणिनामिति मिलितार्थः । **उच्चकैः**— अत्यन्तम् । **हितम्** = कल्याणकरम् । **पदम्** = स्थानम्, मोक्षाद्यात्मकमित्यर्थ : । **कुरुष्व** = विधेहि, देहीति भावः । अङ्गिनोऽतिहितपदभाजः कुर्विति समुदायार्थः । अथवा अङ्गिनां विष्टपे पदम् = संसाराधिकरणकं स्थानम्, सांसारिकत्वमिति यावत् । **उच्चकैः**— उत्कृष्टम् । **हितम्** = कल्याणकरं यथास्यात्तथा, न त्वनिष्टबन्धादिप्रयोजकमिति भावः । **कुरुष्व** = संसारिणः सांसारिकत्वं कल्याणाय यथा स्यान्नत्वनिष्टबन्धायेत्येवं यतस्वेत्यर्थः । यद्वा **अङ्गिनां** पदम् = अङ्गित्वम्, शरीरित्वमित्यर्थः । विष्टपे उच्चकैः हितम् = प्रशस्यं हितकरं वा यथा स्यात्तथा कुरुष्व । अङ्गिनामङ्गित्वं स्वहितमुक्त्यादिसाधनतया परमोपकारकं यथा स्यान्न तु — दुःखायतनतयाऽहितमित्येवं कुरुष्वेति यावत् । यद्वा अङ्गिनामङ्गित्वं सद्धर्माद्याचरणेन प्रशस्यं यथा स्यान्नत्वधर्माचरणेन निन्द्यमित्येवं यतस्वेत्यर्थः । यद्वा विष्टपे उच्चकै र्हितम् = मुक्त्यादिसाधनभूततया परमोपकारकम् । अङ्गिनां पदम् = अङ्गित्वम्, मानुष्यकमिति यावत् कुरुष्व । मनुष्यभवलाभे हि जीवानां मुक्तिलाभसम्भवो न तु भवान्तरेणेति तस्याभिलषणीयतया तत्कुरुष्वेति प्रार्थनम् ॥ ४ ॥

**समस्तपदविग्रहः— सुवर्णकान्ते !** = सुवर्णस्य कान्तिरिव कान्तिर्यस्य स तादृशः. यद्वा, वर्णो रूपम्, स च कान्तिः प्रभा च वर्णकान्ती, शोभने वर्णकान्ती यस्य स तादृशस्तत्सम्बोधने । **विज्ञाननिविष्ट !** = विज्ञाने निविष्ट स्तत्सम्बोधने । विज्ञानेतिपृथक्पदान्वयेन व्याख्याने तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशिष्टं ज्ञानं यस्य स, तत्सम्बोधने। अनन्तविज्ञाननिविष्टेत्येकपदत्वेन व्याख्याने तु अनन्तं च तद्विज्ञानं च तत्र निविष्टेति विग्रहः। **पथप्रकाशने** = पथस्य प्रकाशनं तत्र। धर्मपथप्रकाशने इत्येकपदत्वे तु धर्मस्य पन्थाःपथो वा धर्मपथम् तस्य प्रकाशने तत्र। **अर्हमणे**! =अर्ह प्रकाशकत्वान्मणिरिव, स, तत्सम्बोधने। **विमल**!= विगत मलं यस्मात्स तादृशस्तत्सम्बोधने। **अनन्त**! = न अन्तः, अविद्यमानः अन्तो वा यस्य स तादृशस्तत्सम्बोधने। **शान्ते**! = शम्यादिति कर्त्तर्याशिषि संज्ञायाम् क्तिः, तत्सम्बोधने ॥ ४ ॥

## मूलम्

**निःसीम! सूरतनय! स्थितिमार्गदर्शिन्!**
**निर्माहि शर्म सुदृशां प्रिय! मुक्तिदार!।**
**निर्मृष्टगारुडरुचे! निगृहीतमोह!**
**मल्लेश! मोदितमहाशय! सुव्रतेन!॥५॥** वसन्ततिलका

**अन्वयः**— स्थितिमार्गदर्शिन्! सुदृशां प्रिय! मुक्तिद! निगृहीतमोह! मोदितमहाशय! इन! सूरतनय! अर! मल्लेश! निर्मृष्टगारुडरुचे! सुव्रत! निःसीमशर्म निर्माहि ॥ ५ ॥

**विवृतिः**— **स्थितिमार्गदर्शिन्!** = विधिनिषेधादिमर्यादापथप्रदर्शक!। **सुदृशाम्** = सम्यग्दृष्टीनां भव्यानाम्-**प्रिय** = प्रीतिविषय! यद्वा-सुदृशामित्यस्य शर्मेत्यनेनान्वयः। **मुक्तिद**! = मोक्षदायक! प्रवचनादिना मोक्षमार्गप्रदर्शनेन कृत्वेतिभावः। **निगृहीतमोह**! = परित्यक्तदारागारादिममत्वबुद्धे! वीतरागत्वादिति भावः। "अनित्यधनदेहादौ नित्यत्वेन ममेति च। अज्ञानेनाऽऽवृता बुद्धिर्मोह इत्यभिधीयते।" इति योगशास्त्रे। **मोदितमहाशय**! = हर्षितोदारचेतः! यद्वा मोदित! इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाशय! इति च पृथक्पदम्! तथा च **मोदित**! = ज्ञानादिना प्राप्तनित्यानन्द!। **महाशय**! = उदारचेतः!। **इन**! = ईश!। "ईशितेनोनायकश्च" त्यभि० ३, २३। **सूरतनय**! = सूराख्यनृपपुत्र! गर्भस्थेऽस्मिन् जननी रत्नानां कुन्थराशिं दृष्टवतीति कुन्थुनाथेत्याख्य इत्यर्थः। **अर**! = तदाख्यतीर्थङ्कर! गर्भस्थेऽस्मिन् जनन्या स्वप्ने सर्वरत्नमयोऽरो दृष्ट इति तदाख्येति भावः। **मुक्तिदा**रेत्येकपदत्वेन व्याख्याने च, मुक्तिः स्ववशत्वाद्दारा इव यस्य स तादृशः। **प्रियमुक्तिदा**रेत्येवमेकपदत्वेन व्याख्याने च, प्रिया चतुर्थपुरुषार्थत्वेनेष्टा मुक्तिः सकलकर्मक्षयः स्ववशत्वाद्दारा इव यस्य स तादृशः। प्रियमुक्तिभार्य! इत्यर्थः। **मल्लेश**! = मल्लिनाथ! गर्भस्थेऽस्मिन् मातुः सुरभिकुसुममाल्यशयनीयदोहदो देवताभिः पूरित इति मल्लिः, तथा परिषहादिमल्लजयान्मल्लिः, स चासौ नाथश्च स मल्लिनाथेत्याख्यतीर्थङ्कर!। **निमृष्टगारुडरुचे**! = संस्कृतमरकतकान्ते! श्यामवर्णप्रभ! इत्यर्थः। "गारुत्मतं मरकतमश्मगर्भो हरिन्मणिरि" त्यमरः। **सुव्रत**! = तदाख्यतीर्थङ्कर!, शोभनाऽहिंसादिव्रतशालिन्निति चार्थः। सुव्रतेनेत्येकपदत्वेन व्याख्याने तु सुव्रताऽऽख्यस्वामिन्! स्वयं पाल्यमानत्वादुपदेशकत्वाच्च शोभनाऽहिंसादिव्रतस्वामिन्निति चार्थः। **निःसीम** = निरवधि। **शर्म** = कल्याणम्। **निर्मोहि** = कुरुष्व ॥ ५ ॥

**समस्तपदविग्रहः**— **स्थितिमार्गदर्शिन्**! = स्थितेर्मार्गः, तं दर्शयतीत्येवंशीलः स्थितिमार्गदर्शी तत्सम्बोधने। **सुदृशाम्** = सु समिचीना दृग्येषां ते सुदृशः, तेषाम्। **मुक्तिद**! = मुक्तिं ददातीति-स, तत्सम्बोधने। मुक्तिदारेति व्याख्याने च, मुक्तिः दारा इव दारा यस्य स तत्सम्बोधने। प्रियमुक्तिदारेत्येवं सम्बोधने तु—प्रिया मुक्तिरेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दारा यस्य स तादृशस्तत्सम्बोधने। **निगृहीतमोह!** = निगृहीतो मोहो येन स तादृशस्तत्सम्बोधने। **मोदितमहाशय!** = मोदितो महाशयो येन स तादृशस्तत्सम्बोधने। **सूरतनय!** = सूरस्य तनयः, तत्सम्बोधने। **मल्लेश!** = मल्लश्चासौ ईशश्च, तत्सम्बोधने। **निर्मृष्टगारुडरुचे!** = निर्मृष्टश्चासौ गारुडश्च; निमृष्टगारुडः, तस्य रुचिरिव रुचिर्यस्य स तादृशस्तत्सम्बोधने। **सुव्रत!** = सुशोभनानि व्रतानि यस्य स तादृशस्तत्सम्बोधने। सुव्रतेनेत्येवं सम्बोधने तु सुव्रतश्चासाविनश्च, तत्सम्बोधने। **निःसीम** = सीम्नो निष्कान्तं निःसीम, तत् ॥ ५ ॥

**मूलम्**

**अघो! नमीनाऽङ्कनिरासदक्ष!**
**सम्प्रीणिताऽशेष! समुद्र! नेमे!।**
**शान्तार! वामेय! गुणाभिराम!**
**श्रीवर्धमानैधि सुखश्रिये नः** ॥ ६ ॥ उपजातिः

**अन्वयः**— अघो! अङ्कनिरासदक्ष! सम्प्रीणिताऽशेष! समुद्र! गुणाभिराम! शान्तार! नमीन! नेमे! वामेय! श्रीवर्धमान! नः सुखश्रिये एधि ॥ ६ ॥

**विवृतिः**— **अघो!** = अघोस् इति सम्बोधनार्थमव्ययम्। **अङ्कनिरासदक्ष!** = दोषदूरीकरणसमर्थ!। **सम्प्रीणिताऽशेष!** = सद्धर्मोपदेशादिना हर्षितसमस्तलोक!। **समुद्र!** = वृषभादिलाञ्छनलाञ्छित! अपरिग्रहादिमुनिवेषादियुक्त! कायोत्सर्गलक्षणमुद्रायुक्त! इति वाऽर्थः। **गुणाभिराम!** = दयादिभिः प्रसिद्धैः पञ्चत्रिंशत्सङ्ख्यकैर्वाग्गुणैः, चतुस्त्रिंशदतिशयैश्च मनोज्ञ!। **शान्तार!** = मुक्तत्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुपरताऽवसर्पिण्युत्सर्पिणीकालचक्रविवर्त्तनैकान्तसुषमादिद्वादशविधकालकृतोपाधे !, कालातीत ! इत्यर्थः । यद्वा **शान्त** ! = शमाश्रय ! **अर** ! = तदाख्यतीर्थङ्कर ! । **नमीन** ! = नमिनाथ ! गर्भस्थेऽस्मिन् परचक्रनृपैरपि प्रणतिः कृतेति नमिः, स चासाविनश्चेति भावः, तदाख्यतीर्थङ्कर ! इत्यर्थः । अघोनमीनेत्यत्र " अवर्ण " ( १ । ३ । २२ । सि. है० ) इत्यादिना संधिः । यद्वा-अघोन ! मीनाङ्कनिरासदक्ष ! इत्येवं पदरचना, तथा च – **अघोन** ! = पापरहित ! निर्मलेत्यर्थः । असत्यादिरूपदुरितहेतुसम्पर्कशून्येति यावत् । " कलुषं वृजिनैनोऽघमंहोदुरितदुष्कृतमि " त्यमरः । **मीनाङ्कनिरासदक्ष** ! = कामदूरीकरणकुशल ! ब्रह्मचर्यव्रतधारित्वादिति भावः । **नेमे** ! = तदाख्यतीर्थङ्कर ! धर्मचक्रस्य नेमिवन्नेमे ! धर्मचक्रप्रधितुल्येत्यर्थः । **वामेय** ! = वामानामराज्ञीपुत्र ! श्रीपार्श्वनाथेत्यर्थः । **श्रीवर्धमान** ! = श्रीमन्महावीर ! **नः** = स्तुवतामस्माकं जनानाम् । **सुखश्रिये** = सुखसम्पदे, " शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिवदृश्यते " इत्यमरः । **एधि** = भव ॥ ६ ॥

**समस्तपदविग्रहः– नमीन** ! = नमिश्चासाविनश्च स तत्सम्बोधने । **अङ्कनिरासदक्ष** ! = अङ्कस्य निरासस्तत्रदक्षः, तत्सम्बोधने । पक्षान्तरे, **–अघोन** != अघैरूनः, तत्सम्बोधने । **मीनाङ्कनिरासदक्ष** ! = मीनोऽङ्को यस्य स मीनाङ्कः, तस्य निरासस्तत्र दक्षः, तदामन्त्रणे । **सम्प्रीणिताऽशेष** ! = सम्प्रीणिता अशेषा येन स तादृशः, तत्सम्बोधने । **समुद्र** ! = मुद्रया सह वर्तते इति समुद्रस्तदामन्त्रणे । **गुणाभिराम** != गुणैरभिरामः तत्सम्बोधने । **शान्तार** ! = शान्ता अरा यस्य स तादृशस्तत्सम्बोधने । **वामेय** != वामाया अपत्यं पुमान् वामेयः, तदामन्त्रणे । **श्रीवर्धमान** !=

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्धतामिति वर्धमानः, कर्त्तर्याशिषि संज्ञायामानश्। श्रियायुक्तो वर्धमानः, तत्सम्बोधने। **सुखश्रियै** = सुखस्य श्रीस्तस्यै ॥ ६ ॥

**मूलम्**

**निर्व्याजमेधिततमोहरणैकदक्षे !**

**सर्वज्ञराजिमहनीयपदे ! नयाद्ये ! ।**

**सार्वोदिते ! भव सरस्वति ! पोतरूपे !**

**मिथ्यात्ववारिणि सदा मयि सुप्रसन्ना ॥७॥** वसन्ततिलका

**अन्वयः**— निर्व्याजम् एधिततमोहरणैकदक्षे ! सर्वज्ञराजिमहनीयपदे ! मिथ्यात्ववारिणि पोतरूपे ! नयाद्ये ! सार्वोदिते ! सरस्वति ! मयि सदा सुप्रसन्ना भव ॥ ७ ॥

**विवृतिः**— **निर्व्याजम्** = निष्कपटं यथास्यात्तथा, निःशेषरूपेणेतिभावः । **एधिततमोहरणैकदक्षे** ! = समृद्धाज्ञानविनाशनाऽद्वितीयकौशल्यशालिनि ! **सर्वज्ञराजिमहनीयपदे** ! = केवलिसमुदायपूज्यचरणे, केवलिसमुदायपूज्यवर्णसमूहे, इति चार्थः । **मिथ्यात्ववारिणि** = मिथ्यात्वरूपे सलिले। **पोतरूपे** ! = महानौकायमाने ! तया पोतेन सलिलमिव मिथ्यात्वं तीर्त्वा सम्यक्त्वलाभादिति भावः। यद्वा पोतरूपे इति सप्तम्यन्तं पदं मयीत्यनेन अभेदेनान्वेति, तथा च मिथ्यात्ववारिणीति न सप्तम्यन्तं, किंतु सम्बोधनम्। मिथ्यात्वनाशजनिके ! इति चार्थः। **नयाद्ये** ! = नयप्रधाने ! प्राथम्येन वा नैगमादिनयादि प्रतिपादिके ! इत्यर्थः। **सार्वोदिते**! = सर्वज्ञवाग्रूपे!। **सरस्वति**! = वाणि ! श्रुतदेवि ! इत्यर्थः। यद्वा-नयाद्ये, **सार्वोदिते** सर्वज्ञवाग्रूपे आगमरूपे, **सरस्वति** सागरे, " सारस्वान् सागरो ऽर्णवः" इत्यमरः। **मयि** = स्तोतृजने, पोतरूपे इत्यस्य सप्तम्यन्तत्वेन व्याख्यानपक्षे —

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पोतरूपे** = शिशुतुल्ये, मयीत्यर्थः । "पोतःपाकोऽर्भको डिम्भः पृथुकः शावकः शिशु" रित्यमरः । **सदा सुप्रसन्ना भव** = तव प्रसादादेव तत्त्वज्ञान सम्भवः, नान्यथेतिभावः । यद्वा—सरस्वति ! निर्व्याजमेधिततमोहरणैकदक्षे सर्वज्ञराजि महनीयपदे मिथ्यात्ववारके नयाद्ये सर्वज्ञवाग्रूपे आगमे विषये, बालतुल्ये मयीत्येवमर्थः ॥ ७ ॥

**समस्तपदविग्रहः**— **निर्व्याजम्** = व्याजान्निर्गतं यथास्यात्तथा, **एधिततमोहरणैकदक्षे!** = एधितं च तत्तमश्च, एधिततमः, तस्य हरणम्, तत्र, एका चासौ दक्षा च, तत्सम्बोधने । **सर्वज्ञराजिमहनीयपदे!** = सर्वज्ञानां राजयः, तासु महनीयौ पदौ यस्याः, महनीयानि पदानि-वा त्याद्यन्तरूपाणि यस्याः सा तादृशी, तत्सम्बोधने । **नयाद्ये!** = नयः आद्यः यस्याः सा तादृशी, तत्सम्बोधने । **सार्वोदिते!** = सर्वं जानन्तीति सार्वाः तैरुदिता, तत्सम्बोधने । **सरस्वति!** = सरः अस्ति अस्मिन्निति सरस्वान्, तस्मिन् ॥ ७ ॥

## मूलम्

**एवं श्रीवृषभादयो जिनवराः श्रीवर्धमानान्तिमाः**
**सान्द्रानन्दमखण्डखण्डितपदैर्नूताश्चतुर्विंशतिः ।**
**प्रज्ञोल्लासिलसज्जितप्रभकविव्यावर्ण्यमानोदया**
**भूयासुर्मयि सुप्रसन्नहृदयास्त्रैलोक्यलक्ष्मीश्वराः ॥ ८ ॥**

शार्दूलविक्रीडितम्

**अन्वयः**— एवं प्रज्ञोल्लासिलसज्जिनप्रभकविव्यावर्ण्यमानोदयाः त्रैलोक्यलक्ष्मीश्वराः श्रीवृषभादयः श्रीवर्धमानान्तिमाः चतुर्विंशतिर्जिनवराः अखण्डखण्डितपदैः सान्द्रानन्दं नूताः मयि सुप्रसन्नहृदया भूयासुः ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**विवृति :— एवम्** = पूर्वोक्त प्रकारेण । **प्रज्ञोल्लासिलसज्जिनप्रभकविव्यावर्ण्यमानोदयाः** = नवनवोन्मेषशालिप्रतिभाप्रकाशशीलशोभमानजिनप्रभाभिधबुधसम्यक्कीर्त्यमानाऽभ्युदयाः । **त्रैलोक्यलक्ष्मीश्वराः** = त्रिभुवनलक्ष्मीपतयः । **श्रीवृषभादयः** = श्रीयुतवृषभदेवप्रभृतयः। **श्रीवर्धमानान्तिमाः** = श्रीमहावीरस्वामिपर्यन्ताः । **चतुर्विंशतिः** चतुर्विंशतिसङ्ख्याकाः । **जिनवराः** != जिनश्रेष्ठाः, तीर्थङ्करा इत्यर्थः । **अखण्डखण्डितपदैः** = अभङ्गर्षभाऽभिनन्दनादिसभङ्गाऽजितशम्भवादिशब्दैः । **सान्द्रानन्दम्** = स्निग्धहर्षम्, गाढानन्दपूर्वकमिति यावत् । सातिशयप्रीतिपूर्वकमिति भावः । **नूताः** = स्तुता, सन्तः, यद्यपि धातुपाठे " नु " इति–ह्रस्वत्वविशिष्टः पाठः, तथापि " परिणूत गुणोदयः " इत्यादिवत्समाधानीयम् । **मयि** = स्तोतरि भव्यजने । **सुप्रसन्नहृदयाः**=सम्यक्प्रसन्नमनसः। **भूयासुः**= भवन्तु, स्तुतेः स्तोतव्यप्रसाद एवोपयोगादितिभावः ॥ ८ ॥

**समस्तपदविग्रहः— प्रज्ञोल्लासिलसज्जिनप्रभकविव्यावर्ण्यमानोदयाः** = प्रज्ञयोल्लसतीत्येवंशीलः प्रज्ञोल्लासी, स चासौ लसंश्च प्रज्ञोल्लासिलसन्, जिनप्रभश्चासौ कविश्च जिनप्रभकविः, प्रज्ञोल्लासिलसंश्चासौ जिनप्रभकविश्च, तेन व्यावर्ण्यमान उदयो येषां ते, अथवा प्रज्ञोल्लासिलसन्तश्च ते जिनप्रभकविव्यावर्ण्यमानोदयाश्च, ते तादृशाः । **त्रैलोक्यलक्ष्मीश्वराः** = त्रैलोक्यस्य लक्ष्म्यः, तासामीश्वराः । **श्रीवृषभादयः** = श्रीयुतश्च ते वृषभ आदिर्येषां ते तादृशाः । यद्वा—श्रीयुतो वृषभः श्रीवृषभः, स आदिर्येषां ते तादृशाः । **श्रीवर्धमानान्तिमाः** = अन्ते भवोऽन्तिमः, श्रीयुतो वर्धमानोऽन्तिमो येषां ते तादृशाः । **चतुर्विंशतिः** = चतुराधिका विंशतिः। **जिनवराः** = जयन्ति कामादीन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रीनिति जिनाः तेषु तेषां वा वराः। **अखण्डखण्डितपदैः** = अविद्यमानः खण्डो येषु तानिं, अखण्डानि च तान्यमूनि खण्डः सञ्जातोऽत्रेति खण्डितानि च अखण्डखण्डितानि, तानि च तानि पदानि च तैः। **सान्द्रानन्दम्** = सान्द्र आनन्दो यत्र नवने कर्मणि तद्यथा स्यात्तथा ॥ ८ ॥ समाप्तेयं विवृतिः ॥

आबालब्रह्मचर्यप्रथितगुरुयशःश्रीलनेमेः सुपट्टाऽ—
लङ्काराऽऽचारभारव्रतितितिविदितज्ञान**विज्ञानसूरेः**।
पट्टोल्लासिप्रभावाऽगणितगुणगणख्यात**कस्तूरसूरेः**
शिष्य**श्चन्द्रोदयोऽहं** स्तुतिविवृतिमिमां तत्प्रसादादकार्षम् ॥१॥
अमुष्यां मे कृत्यां स्खलनमिव यातः क्वचिदपि
त्रुटिः काचिद्भायाद्भ्रमतनुजनुश्चेद्बुधवरैः।
विशोध्योदारान्तःकरणविदितैः सत्त्वमहितैः,
सतां सत्त्वं यद् धीः सपदि सुसमाधेरवसरे ॥ २ ॥
**स्तम्भाख्ये** तीर्थवर्ये मुनिखखनयनैः (२००७) सम्मिते विक्रमाब्दे
चातुर्मास्याधिवासे धवलदलयुते चाश्विने **भानुति**थ्याम्।
वारे चन्द्रे समाप्ता स्तुतिविवृतिरियं धीमतो मोदहेतु —
र्जीयादाचन्द्रसूर्यं स्वगुरुकरपयोजन्मयुग्मेऽर्पणेन ॥ ३ ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्री नेमिविज्ञान ग्रन्थमालानां प्रकाशनो.

१. कलिकाल सर्वज्ञ श्रीहेमचन्द्राचार्य विरचित
**अभिधान चिंतामणि कोश**—
आचार्य श्रीविजय कस्तूरसूरीश्वर रचित
चन्द्रोदयाभिधगुर्जरभाषानुवादसमेत.

२. आचार्य श्रीविजय कस्तूरसूरीश्वर रचित—
**"पाईअ विन्नाण कहा।"**

For Private And Personal Use Only